श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये द्विपञ्चाशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये द्विपञ्चाशं दशकम् ॥

## ब्रह्मकृतवत्सापहारवर्णनम्

अन्यावतारनिकरेष्वनिरीक्षितं ते
भूमातिरेकमभिवीक्ष्य तदाघमोक्षे।
ब्रह्मा परीक्षितुमनाः स परोक्षभावं
निन्येऽथ वत्सकगणान् प्रवितत्य मायाम् ॥ **52.1** ॥

वत्सानवीक्ष्य विवशे पशुपोत्करे ता -
नानेतुकाम इव धातृमतानुवर्ती।
त्वं सामिभुक्तकबलो गतवांस्तदानीं
भुक्तांस्तिरोऽधित सरोजभवः कुमारान् ॥ **52.2** ॥

वत्सायितस्तदनु गोपगणायितस्त्वं
शिक्यादिभाण्डमुरलीगवलादिरूपः।
प्राग्वद्विहृत्य विपिनेषु चिराय सायं
त्वं मायया‌ऽथ बहुधा व्रजमाययाथ ॥ **52.3** ॥

त्वामेव शिक्यगवलादिमयं दधानो
भूयस्त्वमेव पशुवत्सकबालरूपः।
गोरूपिणीभिरपि गोपवधूमयीभि -
रासादितोऽसि जननीभिरतिप्रहर्षात् ॥ **52.4** ॥

जीवं हि कञ्चिदभिमानवशात्स्वकीयं
मत्वा तनूज इति रागभरं वहन्त्यः।

आत्मानमेव तु भवन्तमवाप्य सूनुं
प्रीतिं ययुर्न कियतीं वनिताश्च गावः ॥ **52.5** ॥

एवं प्रतिक्षणविजृम्भितहर्षभार -
निश्शेषगोपगणलालितभूरिमूर्तिम्।
त्वामग्रजोऽपि बुबुधे किल वत्सरान्ते
ब्रह्मात्मनोरपि महान् युवयोर्विशेषः ॥ **52.6** ॥

वर्षावधौ नवपुरातनवत्सपालान्
दृष्ट्वा विवेकमसृणे द्रुहिणे विमूढे।
प्रादीदृशः प्रतिनवान् मकुटाङ्गदादि -
भूषांश्चतुर्भुजयुजः सजलाम्बुदाभान् ॥ **52.7** ॥

प्रत्येकमेव कमलापरिलालिताङ्गान्
भोगीन्द्रभोगशयनान् नयनाभिरामान्।
लीलानिमीलितदृशः सनकादियोगि -
व्यासेवितान् कमलभूर्भवतो ददर्श ॥ **52.8** ॥

नारायणाकृतिमसङ्ख्यतमां निरीक्ष्य
सर्वत्र सेवकमपि स्वमवेक्ष्य धाता।
मायानिमग्नहृदयो विमुमोह याव -
देको बभूविथ तदा कबलार्धपाणिः ॥ **52.9** ॥

नश्यन्मदे तदनु विश्वपतिं मुहुस्त्वां
नत्वा च नूतवति धातरि धाम याते।
पोतैः समं प्रमुदितैः प्रविशन् निकेतं
वातालयाधिप विभो परिपाहि रोगात् ॥ **52.10** ॥

॥ इति श्रीमन्नारायणीये द्विपञ्चाशं दशकं समाप्तम् ॥